कक्षा
10

प्रवेशिका
संस्कृत–द्वितीयपत्रम्

# काव्यकौमुदी

(द्वितीयो भागः)



कक्षा 10
काव्यकौमुदी (द्वितीयो भागः)

# काव्यकौमुदी (द्वितीयो भागः)

(प्रवेशिकाकक्षायै स्वीकृतं पाठ्यपुस्तकम्)

**माध्यमिक-शिक्षा-बोर्ड राजस्थानम्, अजयमेरुः**

# पाठ्यपुस्तक-लेखन-समितिः

काव्यकौमुदी (द्वितीयो भागः)
(प्रवेशिकाकक्षायै स्वीकृतं पाठ्यपुस्तकम्)

सङ्कलयितारो व्याख्याकाराश्च
**बहादुरसिंह गुर्जरः ( संयोजकः )**
सहायक-निदेशकः
संस्कृतशिक्षाविभागः, राजस्थानम्, जयपुरम्

**डॉ. जयप्रकाश मिश्रः**
व्याख्याता (संस्कृतवाङ्मयम्)
राजकीय-शास्त्रि-संस्कृत-महाविद्यालयः
महापुरा, जयपुरम् (राज.)

**डॉ. धर्मसिंह गुर्जरः**
व्याख्याता (व्याकरणशास्त्रम्)
राजकीय-शास्त्रि-संस्कृत-महाविद्यालयः
बौंली, सवाईमाधोपुरम् (राज.)

**डॉ. शिवचरण शर्मा**
प्राध्यापकः (साहित्यशास्त्रम्)
राजकीय-वरिष्ठोपाध्याय-संस्कृतविद्यालयः
महापुरा, जयपुरम् (राज.)

# पाठ्यक्रम–निर्माण–समितिः

## काव्यकौमुदी (द्वितीयो भागः)

### (कक्षा प्रवेशिका )

संयोजक– श्री विमल कुमार जैन (आई.ए.एस.)
निदेशक संस्कृत शिक्षा, राजस्थान, जयपुर

सदस्य–

1. श्री बहादुर सिंह गुर्जर
   सहायक निदेशक, संस्कृत शिक्षा, राजस्थान, जयपुर
2. श्री नाथूलाल सुमन, संयुक्त सचिव
   उच्च शिक्षा शासन सचिवालय, जयपुर
3. योगेन्द्र धामा, व्याख्याता
   राजकीय महाविद्यालय, अलवर
4. डॉ. हरि सिंह राजपुरोहित, व्याख्याता,
   राजकीय महाविद्यालय, ओसियां, जोधपुर
5. श्री हरिओम गौतम, व्याख्याता
   राजकीय शास्त्री संस्कृत महाविद्यालय, भरतपुर
6. श्री रामावतार सिंह, प्रधानाध्यापक,
   आदर्श राजकीय प्रवेशिका संस्कृत विद्यालय, धौलपुर
7. श्री प्रदीप कुमार भट्ट, प्रधानाध्यापक,
   आदर्श राजकीय प्रवेशिका संस्कृत विद्यालय, डूंगरपुर
8. श्री महेश चन्द्र शर्मा, वरि. अध्यापक,
   राजकीय वरि.उपाध्याय संस्कृत विद्यालय, सावर, अजमेर

# शब्दद्वयम्

पाठ्यपुस्तकमिदं विद्यार्थिनां कृते क्रमबद्धाध्ययन–पुष्टीकरण–समीक्षणादीनाम् आगाम्यध्ययनस्य च आधार: विद्यते। विषयवस्तुन: शिक्षणविधेश्च दृष्ट्या विद्यालयीय–पाठ्यपुस्तकानां स्तर: अत्यन्तं महत्त्वपूर्ण: भवति। पाठ्यपुस्तकानि कदापि स्थावराणि वा असन्महिमामण्डनकराणि वा न भवेयु:। अद्यापि पाठ्यपुस्तकं शिक्षणाधिगम–प्रक्रियाया: एकम् अनिवार्यम् उपकरणं विद्यते, यस्य वयम् उपेक्षां कर्तुं नैव शक्नुम:।

विगतवर्षेषु माध्यमिक–शिक्षा–मण्डल–राजस्थानस्य पाठ्यक्रमे भाषागत–सांस्कृतिकस्थितीनां प्रतिनिधित्वस्य अभाव: अनुभूयते स्म। एतत् दृष्टिगोचरं कृत्वा राज्यसर्वकारेण नवमी/प्रवेशिका–कक्षात: द्वादशी/वरिष्ठोपाध्याय–कक्षापर्यन्तम् अध्ययनरतानां विद्यार्थिनां कृते माध्यमिक–शिक्षा–मण्डल–राजस्थान–अजयमेरुद्वारा स्वकीयं पाठ्यक्रमं संचालयितुं निर्णय: कृत:।

तदनुसारं बोर्डद्वारा शिक्षणसत्र – २०१७–२०१८ त: दशमी/प्रवेशिका–द्वादशी/वरिष्ठोपाध्याय–कक्षाणां पाठ्यपुस्तकानि निर्धारित–पाठ्यक्रमानुसारं प्रस्तुतानि। आशासे यत् एतानि पुस्तकानि विद्यार्थिषु मौलिक–चिन्तन–मनन–स्वाध्यायाभिव्यक्तीनाम् अवसरान् समुत्पादयिष्यन्ति।

**प्रो. बी.एल. चौधरी**
**अध्यक्ष:**
**माध्यमिक–शिक्षा–बोर्ड–राजस्थानम्, अजयमेरु:**

# प्रास्ताविकं किञ्चित्

संसारस्य सर्वासु भाषासु प्राचीनतमा परिष्कृता च संस्कृतभाषा भारतीयसंस्कृतेः प्राणभूता वर्तते। संस्कृतसाहित्यस्य वैभवबलेन एव भारतः विश्वगुरुपदं प्राप्तवानासीत्। विश्ववाङ्मयमुकुटमणिभूता वेदाः, उपनिषदः आरण्यक-ब्राह्मणग्रन्थाः, स्मृतयः पुराणादीनि च संस्कृतभाषानिबद्धानि एव सन्ति। संस्कृतसाहित्यस्य विशालता, व्यापकता वैज्ञानिकता च सुविदिता अस्ति।

संस्कृतसाहित्ये, शास्त्राध्ययनेन सहैव काव्यमाध्यमेन सरसतासम्पादनपूर्वकं सदुपदेशदानस्य सुप्रथिता परम्परा विराजते। संस्कृते प्रमुखतया गद्य-पद्य-भेदेन काव्यं द्विविधमङ्गीक्रियते। नाटकादीनि गद्यपद्यमिश्रितानि प्रसिद्धानिए व ास ंस्कृतभाषायाअ ध्यापनक्रमे० याकरणशास्त्रेणस हैवक ाव्यशिक्षणस्यापिम हत्त्वपूर्णाभ ूमिका वर्तते। व्याकरणसिद्धान्तानां प्रायोगिकं स्वरूपं काव्येषु सम्यक्तया द्रष्टुमवगन्तुं च शक्यते।

संस्कृतशिक्षाविभागस्य प्रवेशिकाकक्षायां संस्कृतभाषाया विशिष्टशिक्षणं लक्ष्यीकृत्य माध्यमिकशिक्षा-बोर्ड-राजस्थान, अजमेर-द्वारा संस्कृतस्य प्रश्नपत्रद्वयं निर्धारितं वर्तते। तदनुसारं प्रथमे प्रश्नपत्रे व्याकरणशास्त्रस्य द्वितीये प्रश्नपत्रे च काव्यशिक्षणस्य व्यवस्था कल्पिता वर्तते। द्वितीये प्रश्नपत्रे गद्य-पद्य-काव्यशिक्षणेन सहैव छन्दोऽलङ्कारकोश-रचना-शब्दरूप-धातुरूप-सन्निवेशोऽपि छात्राणां संस्कृतभाषादक्षतावर्धनाय कृतो वर्तते।

माध्यमिक-शिक्षा-बोर्ड, राजस्थानस्य प्रवेशिका-कक्षायाः पाठ्यक्रमानुसारं सज्जीकृतेऽस्मिन् ''काव्यकौमुदी-द्वितीयो भागः'' नामके संस्कृतपाठ्यपुस्तके स्तरीयपाठ्यवस्तुना सहैव अभ्यासप्रश्नानामपि समुचितः समावेशः कृतो विद्यते। भाषादक्षतासम्पादनाय चात्र प्रकृतिप्रत्ययादीनामपि यथावसरं परिचयः प्रदत्तः अस्ति।

पाठ्यपुस्तकस्यास्य पद्यभागे महर्षिवेदव्यासविरचितमहाभारताङ्गभूतश्रीमद्भगवद्गीतातः 'गीतामृतम्' श्रीभर्तृहरिविरचितात् नीतिशतकात् 'सुभाषितानि', श्रीमद्वाल्मीकिरामायणात् 'रामो द्विर्नाभिभाषते', डॉ. श्रीधरभास्करवर्णेकरविरचितात् 'विवेकानन्दविजय'नाटकात् 'विवेकानन्दाष्टकम्', महाकविकालिदासविरचिताद् रघुवंशमहाकाव्याच्च 'रघुकौत्ससंवादः इत्येते पाठाः सङ्कलिताः सन्ति।

गद्यभागे श्रीविष्णुशर्मविरचितस्य पञ्चतन्त्रस्य पञ्चभ्यः तन्त्रेभ्यः एकैकां कथां चित्वा पञ्च कथाः सङ्कलिताः सन्ति। छन्दोऽलङ्कारकोशादीनां पाठ्यक्रमानुसारं निर्धारितांशोऽपि पुस्तके यथास्थानं संयोजितो वर्तते। रचनाभागे निबन्ध-पत्र-लेखन-कौशलवर्धनाय चावश्यक-दिशानिर्देशेन सहैव पञ्च पत्राणि द्वादश निबन्धाश्च प्रस्तुताः सन्ति। पाठ्यक्रमे निर्धारितानि शब्दरूपाणि धातुरूपाणि चापि पाठरूपेण गुम्फितानि सन्ति। सर्वमाहत्य पुस्तके पञ्चदश पाठाः सन्ति।

आशासे यद् गद्य-पद्य-काव्य-कोशच्छन्दोऽलङ्कार-रचना-शब्दरूप-धातुरूप-समृद्धं प्रवेशिकाच्छात्राणां कृते निर्धारितं संस्कृतपाठ्यपुस्तकमिदं 'काव्यकौमुदी-द्वितीयो भागः' अध्येतॄणां ज्ञानवर्धने, रसानुभूतिकरणे सदुपदेशप्रदाने च सर्वथा सफलं भविष्यतीति शम्।

**संयोजकः**

# पाठ्यक्रमः

## प्रवेशिका - कक्षा-१०

## विषयः – संस्कृतम् ( द्वितीय-प्रश्नपत्रम् )

(गद्य-पद्य-कोष-अलङ्कार-रचना-शब्द-धातुरूपाणि)

**समयः** – सपादहोरात्रयम् **पूर्णाङ्कः** - ८०+२० = १००

| | | |
|---|---|---|
| १. | गद्यकाव्यम् | २५ |
| २. | रचना (निबन्ध-पत्रलेखनम्, शब्दरूप-धातुरूपाणि च) | १५ |
| ३. | पद्यकाव्यम् | २५ |
| ४. | छन्दांसि | ०५ |
| ५. | अलङ्काराः | ०५ |
| ६. | कोशः | ०५ |

**गद्यकाव्यम्** **२५**

(क) पाठ्यपुस्तकात् द्वयोः गद्ययोः सप्रसङ्ग-व्याख्या १+४ =५×२ = १०

(ख) अतिलघूत्तरात्मक-प्रश्नाः ०५

(ग) लघूत्तरात्मकप्रश्नाः ०५

(घ) एकस्य पाठस्य संस्कृतभाषायां सारांश-लेखनम् ०५

**रचना** **१५**

(क) निबन्धाः – मम प्रिय कविः, भारतीयसंस्कृतिः, अहिंसा परमो धर्मः, स्वच्छता, स्वस्थवृत्तम्, संस्कृते विज्ञानम्, संस्कृतदिवसः, कालिदासः, माघः, वर्षप्रतिपदा (नूतनवर्षम्), महाराणाप्रतापः, श्रीरामः, श्रीकृष्णः, एतेषु एकः निबन्धः। ४

(ख) पत्रम्– रुग्णता-विवाह-भ्रमणादिविषयेषु अवकाशाय प्रार्थनापत्रम्। ३

अथवा

ग्रामस्य/नगरस्य/ विकासाय जनप्रतिनिधीनां कृते कमपि विषयमाधृत्य पत्रमेकम्।

(ग) शब्दरूपाणि– ४

बालक, लता, पति, सखि, भानु, मधु, वधू, मातृ, जगत्, भवत्, करिन् अस्मद्, युष्मद्, तत् (त्रिषु लिङ्गेषु)

(घ) धातुरूपाणि– ४

अस्, कृ, चुर्, नृत्, लभ्, धाव्, क्रीड्, प्रच्छ्, दा, जि, तुद्, वद्-इत्यादि-धातूनां

**पद्यकाव्यम्** **२५**

(क) पाठ्यपुस्तकात् द्वयोः पद्ययोः सप्रसङ्ग-व्याख्या ३×२ = ०६

(ख) विषयवस्तुसम्बन्धिनः अतिलघूत्तरात्मकप्रश्नाः ०५

(ग) विषयवस्तुसम्बन्धिनः लघूत्तरात्मकप्रश्नाः ०५

(घ) कृति-कृतिकारयोर्विषये लघूत्तरात्मकप्रश्नाः ०५

(ङ) द्वयोः श्लोकयोः सप्रसङ्गभावार्थलेखनम् २×२ = ०४

**छन्दांसि** **०५**

प्रहर्षिणी, वसन्ततिलका, मालिनी, मन्दाक्रान्ता, स्रग्धरा, हरिणी, शिखरिणी, शार्दूलविक्रीडितम्

**अलङ्काराः** **०५**

अनुप्रासः, यमकः, श्लेषः, विभावना, उपमा, रूपकम्, दृष्टान्तः, विशेषोक्तिः

**कोशः** **०५**

अमरकोशस्य प्रथमकाण्डस्य सप्तमश्लोकतः चतुश्चत्वारिंशत्-श्लोकपर्यन्तम्।

(स्वर्गवर्गतः देवनामतः इन्द्रनामपर्यन्तम्)

**निर्धारित-पुस्तकम्**

**काव्यकौमुदी** द्वितीयो भागः